# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री गीत गोविंद॥



### ॥ गीतम् 21 ॥

**(अथ एकविं(म्)शतितमः(फ्) प्रबन्धो वराडीरागेण अडवताले गीयते)**

**मञ्जुतरकुञ्जतलकेलिसदने ।**

**विलस रतिरभसहसितवदने ॥**

**प्रविश राधे माधवसमीपमिह ॥ 1॥**

**नवभवदशोकदलशयनसारे ।**

**विलस कुचकलशतरलहारे ॥ 2॥ प्रविश**

**कुसुमचयरचितशुचिवासगेहे ।**

**विलस कुसुमसुकुमारदेहे ॥ 3॥ प्रविश**

**मृदुचलमलयपवनसुरभिशीते ।**

**विलस रसवलितललितगीते ॥ 4॥ प्रविश**

**विततबहुवल्लिनवपल्लवघने ।**

**विलस चिरमिलितपीनजघने ॥ 5॥ प्रविश**

मधुमुदितमधुपकुलकलितरावे ।
विलस दशनरभसरसभावे ॥ 6॥ प्रविश

मधुरतरपिकनिकरनिनदमुखरे ।
विलस दशनरुचिरुचिरशिखरे ॥ 7॥ प्रविश

विहितपद्मावतीसुखसमाजे ।
भणति जयदेवकविराजे ।
कुरु मुरारे मङ्गलशतानि ॥ 8॥ प्रविश